श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये त्रिसप्ततितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये त्रिसप्ततितमं दशकम् ॥

## मथुरापुरयात्रावर्णनम्

निशमय्य तवाथ यानवार्तां
    भृशमार्ताः पशुपालबालिकास्ताः।
किमिदं किमिदं कथं न्वितीमाः
    समवेताः परिदेवितान्यकुर्वन् ॥ 73.1 ॥

करुणानिधिरेष नन्दसूनुः
    कथमस्मान् विसृजेदनन्यनाथाः।
बत नः किमु दैवमेवमासी -
    दिति तास्त्वद्गतमानसा विलेपुः ॥ 73.2 ॥

चरमप्रहरे प्रतिष्ठमानः
    सह पित्रा निजमित्रमण्डलैश्च।
परितापभरं नितम्बिनीनां
    शमयिष्यन् व्यमुचः सखायमेकम् ॥ 73.3 ॥

अचिरादुपयामि सन्निधिं वो
    भविता साधु मयैव सङ्गमश्रीः।
अमृताम्बुनिधौ निमज्जयिष्ये
    द्रुतमित्याश्वसिता वधूरकार्षीः ॥ 73.4 ॥

सविषादभरं सयाच्ञमुच्चैः
    अतिदूरं वनिताभिरीक्ष्यमाणः।

मृदु तद्दिशि पातयन्नपाङ्गान्
    सबलोऽक्रूररथेन निर्गतोऽभूः ॥ **73.5** ॥

अनसा बहुलेन वल्लवानां
    मनसा चानुगतोऽथ वल्लभानाम्।
वनमार्तमृगं विषण्णवृक्षं
    समतीतो यमुनातटीमयासीः ॥ **73.6** ॥

नियमाय निमज्य वारिणि त्वा -
    मभिवीक्ष्याथ रथेऽपि गान्दिनेयः।
विवशोऽजनि किं न्विदं विभोस्ते
    ननु चित्रं त्ववलोकनं समन्तात् ॥ **73.7** ॥

पुनरेष निमज्य पुण्यशाली
    पुरुषं त्वां परमं भुजङ्गभोगे।
अरिकम्बुगदाम्बुजैः स्फुरन्तं
    सुरसिद्धौघपरीतमालुलोके ॥ **73.8** ॥

स तदा परमात्मसौख्यसिन्धौ
    विनिमग्नः प्रणुवन् प्रकारभेदैः।
अविलोक्य पुनश्च हर्षसिन्धो -
    रनुवृत्त्या पुलकावृतो ययौ त्वाम् ॥ **73.9** ॥

किमु शीतलिमा महान् जले यत्
    पुलकोऽसाविति चोदितेन तेन।
अतिहर्षनिरुत्तरेण सार्धं
    रथवासी पवनेश पाहि मां त्वम् ॥ **73.10** ॥

॥ इति श्रीमन्नारायणीये त्रिसप्ततितमं दशकं समाप्तम् ॥